विनियोगः- ॐ अस्य श्रीभौममन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, अंगारको देवता, अं बीजं, आपः शक्तिः, अंगारकप्रीतये जपे विनियोगः। ❖**देहांगन्यासः**-ॐ ब्रह्माऋषये नमः **शिरषि**, ॐ गायत्री-छन्दसे नमः **मुखे**, ॐ अंगारक देवतायै नमः **हृदये**, ॐ अं बीजाय नमः **गुह्ये**, ॐ आपः शक्तये नमः **पादयोः**। ❖**करन्यास**-ॐ आं **अंगुष्ठाभ्यां नमः**,ॐ ईं **तर्जनीभ्यां नमः**,ॐ ऊं **मध्यमाभ्यां नमः**, ॐ ऐं **अनामिकाभ्यां नमः**, ॐ औं **कनिष्ठकाभ्यां नमः**, ॐ अः **करतलकरपृष्ठाभ्यां नमः**, ❖**हृदयादिन्यास**-ॐ आं **हृदयाय नमः**, ॐ ईं **शिरसे स्वाहा**, ॐ ऊं **शिखये वषट्**, ॐ ऐं **कवचाय हुम्**, ॐ औं **नेत्रत्रयाय वौषट्**, ॐ अः **अस्त्राय फट्**। ध्यानम्- **नमाम्यंगारकं देवं** रक्ताम्बरविभूषणम्। जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम्।

बुध का न्यास सहित तान्त्रिक मन्त्र- ॐ बुं बुधाय नमः।

❖**विनियोगः**-ॐ अस्य श्रीबुधमन्त्रस्य ब्रह्मा ऋषिः, पंक्तिश्छन्दः, बुधो देवता,बुं बीजं,आपः शक्तिः, बुध प्रीतये जपे विनियोगः।❖**देहांगन्यासः**-ब्रह्माऋषये नमः **शिरसि**। ॐ पंक्तिश्छन्दसे नमः **मुखे**। ॐ बुधदेवतायै नमः **हृदये**। ॐ बुं बीजाय नमः **गुह्ये**। ॐ आपः शक्तये नमः **पादयोः**। ❖**करन्यासः**-ॐ बुं **अगुष्ठाभ्यां नमः**। ॐ बुं **तर्जनीभ्यां नमः**। ॐ बुं **मध्यमाभ्यां नमः**। ॐ बुं **अनामिकाभ्यां नमः**। ॐ बुं **कनिष्ठकाभ्यां नमः**। ॐ बुं **करतलकर- पृष्ठाभ्यां नमः**। ❖**हृदयादिन्यासः**-ॐ बुं **हृदयाय नमः**। ॐ बुं **शिरसे स्वाहा**, ॐ बुं **शिखायै वषट्**, ॐ बुं **कवचाय हुम्**, ॐ बुं **नेत्रत्रयाय वौषट्**, ॐ बुं **अस्त्राय फट्**।
ध्यान- ॐ **बन्दे बुधं सदा देवं पीताम्बरसुभूषणम्। जानुस्थवामहस्ताढ्यं साभयेतरपाणिकम्**।।

गुरु(बृहस्पति) का तान्त्रिक मन्त्र- ॐ बृं बृहस्पतये नमः।

विनियोगः ॐ अस्यश्रीबृहस्पतिमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप्छन्दः, बृहस्पतिर्देवता, बृं बीजम्, नमः शक्तिः, श्रीबृहस्पतिप्रीतये जपे विनियोगः। ❖**ऋष्यादिन्यासः**-ॐ ब्रह्माऋषये नमः **शिरसि**, ॐ अनुष्टुप्छन्दसे नमः **मुखे**,ॐ बृहस्पतिर्देवतायै नमः **हृदये**, ॐ बृं बीजाय नमः **गुह्ये**, ॐ नमः शक्तये नमः **पादयोः**,❖**करन्यासः**-ॐ ब्राँ **अंगुष्ठाभ्यां नमः**,ॐ ब्रीं **तर्जनीभ्यां नमः**,ॐ ब्रूँ **मध्यमाभ्यां नमः**, ॐ ब्रैं **अनामिकाभ्यां नमः**, ॐ ब्रौं **कनिष्ठिकाभ्यां नमः**, ॐ ब्रः **करतल करपृष्ठाभ्यां नमः**। ❖**हृदयादिन्यासः**-ॐ ब्राँ **हृदयाय नमः**, ॐ ब्रीं **शिरसे स्वाहा**,ॐ ब्रूँ **शिखायै वषट्**,ॐ ब्रैं **कवचाय हुम्**, ॐ ब्रौं **नेत्रत्रयाय वौषट्**, ॐ ब्रः **अस्त्राय फट्**। ❖**ध्यानम्**-तेजोमयं शक्तित्रिशूलहस्तं सुरेन्द्रसंघस्तुतपादपंकजम्। मेधानिधिं मत्स्यगतं द्विबाहुं गुरुं भजे मानस पंकजेऽहम्।।

शुक्र का न्यास सहित तान्त्रिक मन्त्र- ॐ शुं शुक्राय नमः।

❖विनियोगः-ॐ अस्य श्रीशुक्रमन्त्रस्य ब्रह्मा ऋषिः, पंक्तिश्छन्दः, शुक्रो देवता, शुं बीजं स्वाहम्, स्वाहा शक्तिः, श्रीशुक्र प्रीत्यर्थे जपे विनियोगः। ❖**ऋष्यादिन्यास**-ॐ ब्रह्मऋषये नमः**शिरसि**, ॐ पंक्तिश्छन्दसे नमः **मुखे**, ॐ शुक्रदेवतायै नमः हृदये, ॐ शुं बीजाय नमः **गुह्ये**, ॐ स्वाहा शक्तये नमः **पादयोः**, ❖**करन्यासः**-ॐ शुं **अंगुष्ठाभ्यां नमः**,ॐ शुं **तर्जनीभ्यां नमः**, ॐ शुं **मध्यमाभ्यां नमः**, ॐ शुं **अनामिकाभ्यां नमः**,ॐ शुं **कनिष्ठिकाभ्यां नमः**, ॐ शुं **करतल करपृष्ठाभ्यां नमः**। ❖हृदयादिन्यास-ॐ शुं **हृदयाय नमः**,ॐ शुं,**शिरसे स्वाहा**, ॐ शुं **शिखायै वषट्**, ॐ शुं, **कवचाय हुम्**, ॐ शुं **नेत्रत्रयाय वौषट्**, ॐ शुं **अस्त्राय फट्**।
•**ध्यानम्**- ॐ सन्तप्त- काञ्चननिभं द्विभुजं दयालुं पीताम्बरं धृतसरोरुह- केशयुग्मम्। क्रौञ्चासनं असुरसेवितपादपद्मं शुक्रं भजे द्विनयनं हृदि पंकजेऽहम्।।

शनि का मन्त्र- ॐ शं शनैश्चराय नमः।

❖**विनियोगः**-ॐ अस्य श्रीशनैश्चरमन्त्रस्य ब्रह्माऋषिः, गायत्री छन्दः, शनैश्चरो देवता, शं बीजम्, आपः शक्तिः, श्रीशनैश्चरप्रीतये जपे विनियोगः।
❖**ऋष्यादिन्यासः**- ॐ ब्रह्माऋषये नमः **शिरसि**, ॐ गायत्रीछन्दसे नमः **मुखे**, ॐ शनैश्चरदेवतायै नमः **हृदये**, ॐ शं बीजाय नमः **गुह्ये**, ॐ आपः शक्तये नमः **पादयोः**। ❖**करन्यासः**-ॐ शं **अंगुष्ठाभ्यां नमः**, ॐ शं **तर्जनीभ्यां नमः**, ॐ शं **मध्यमाभ्यां नमः**,ॐ शं **अनामिकाभ्यां नमः**, ॐ शं **कनिष्ठिकाभ्यां नमः**, ॐ शं **करतल करपृष्ठाभ्यां नमः**।
❖**हृदयादिन्यासः**- ॐ शं **हृदयाय नमः**, ॐ शं **शिरसे स्वाहा**, ॐ शं **शिखायै वषट्**, ॐ शं **कवचाय हुम्**, ॐ शं **नेत्रत्रयाय वौषट्**, ॐ शं **अस्त्राय फट्**। **ध्यानम्**- ॐ नीलांजनाभं मिहिरस्य पत्रं ग्रहेश्वरं पाशभुजंगपाणिम्। सुरासुराणां भयदं द्विबाहुं भजे शनिं मानस पंकजेऽहम्।।

राहु का तान्त्रिक मन्त्र- ॐ रां राहवे नमः

विनियोगः-ॐ अस्य श्रीराहु मन्त्रस्य ब्रह्माऋषिः, पंक्तिश्छन्दः, राहुर्देवता, रां बीजम्, वेशः शक्तिः, श्रीराहुप्रीतये जपे विनियोगः। **देहांगन्यासः**-ॐ ब्रह्मऋषये नमः**शिरसि**, ॐ पंक्तिछन्दसे नमः **मुखे**, ओं राहुदेवतायै नमः **हृदये**, ओं रां बीजाय नमः **गुह्ये**, ओं वेशः शक्तये नमः **पादयोः**,। **करन्यासः**-ॐ रां **अंगुष्ठाभ्यां नमः**, ॐ रां **तर्जनीभ्यां नमः**, ॐ रां **मध्यमाभ्यां नमः**, ॐ रां **अनामिकाभ्यां नमः**, ॐ रां **कनिष्ठिकाभ्यां नमः**, ॐ रां **करतल करपृष्ठाभ्यां नमः**। हृदयादिन्यासः- ॐ रां **हृदयाय नमः**, ॐ रां **शिरसे स्वाहा**, ॐ रां **शिखायै वषट्**, ॐ रां **कवचाय हुम्**, ॐ रां **नेत्रत्रयाय वौषट्**, ॐ रां **अस्त्राय फट्**। ध्यान- **वन्दे राहुं धूम्रवर्णं अर्धकायं कृताञ्जलिम्।**
विकृतास्यं रक्तनेत्रं धूम्रालङ्कारमन्वहम् ।।

केतु का तान्त्रिक मन्त्र- ॐ कें केतवे नमः

❖विनियोगः- ॐ अस्य श्रीकेतुमन्त्रस्य श्रीब्रह्माऋषिः, पंक्तिश्छन्दः, केतुर्देवता, कें बीजं, वेशः शक्तिः, श्रीकेतुप्रीतये जपे विनियोगः। ❖**ऋष्यादिन्यासः**-ॐ ब्रह्मऋषये नमः **शिरषि**,ॐ पंक्तिश्छन्दसे नमः मुखे, ॐ केतुर्देवतायै नमः **हृदये**, ॐ कें बीजाय नमः **गुह्ये**, ॐ वेशः शक्तये नमः **पादयोः** ❖**करन्यासः**-ॐ कें **अंगुष्ठाभ्यां नमः**,ॐ कें **तर्जनीभ्यां नमः**, ॐ कें **मध्यमाभ्यां नमः**,ॐ कें **अनामिकाभ्यां नमः**, ॐ कें **कनिष्ठिकाभ्यां नमः**, ॐ कें **करतल करपृष्ठाभ्यां नमः**। ❖**हृदयादिन्यासः**- ॐ कें **हृदयाय नमः**, ॐ कें **शिरसे स्वाहा**, ॐ कें **शिखायै वषट्**, ॐ कें **कवचाय हुम्**, ॐ कें **नेत्रत्रयाय वौषट्**, ॐ कें **अस्त्राय फट्**। **ध्यानम्**- ॐ वन्दे केतुं कृष्णवर्णं कृष्णवस्त्रविभूषणम्। [illegible]रुन्यस्ततद्धस्तं साभयेतरपाणिकम्।

ग्रहों का सामवेदीयशान्ति मन्त्र-

सूर्य-ॐ उदुत्यञ्जातवेदसं देवं वहन्ति केतवः। दृशे विश्वायसूर्यम्।
चन्द्र-ॐ सन्ते पयांसि समयन्तुवाजाः संवृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानिधिष्व।।
कुजस्य-ॐ अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्या अयमपागुं रेतागुंसि जिन्वति।
बुधः- ॐ अग्ने विवश्वदुषसश्चित्रां राह्नो अमर्त्य आदाशुषे।
जातवेदो वहात्वमद्या देवो उपर्व्बुधः।।
गुरोः-ॐ वृंहस्पते परिदीयारथेन रक्षोहामित्रां अपवाधमानः ।
प्रभञ्जत्सेनाः प्रमृणो युधाजयन्नस्माकंमेध्यविता रथानाम्।।
शुक्रस्य-शुक्रन्ते अन्यद्यजन्ते अन्यद्विषुरूपे अहनी द्यौरिवासि विश्वाहि माया।
अवसि स्वधावन् भद्रा ते पूषन्निह रातिरस्तु।
शनेः- ॐ शन्नो देवीरभिष्टय शन्नो भवन्तु पीतये। संयोरभिस्रवन्तु नः।
राहोः- ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा। कयाशचिष्ठया वृता।
केतोः- ॐ केतुं कृण्वन्न केतवे पेशोमर्या अपेशसे । समुषद्भिरजायथाः।

ग्रहों का बीज मन्त्र-

सूर्य-ॐ हीं हौं सूर्याय नमः।
चन्द्र-ॐ ऐं क्लीं सोमाय नमः।
मंगल-ॐ हुँ श्रीं भौमाय नमः।
बुध-ॐ ऐं श्रीं श्रीं बुधाय नमः।
गुरु-ॐ हीं क्लीं हुँ बृहस्पतये नमः।
शुक्र-ॐ ह श्रीं शुक्राय नमः।
शनि-ॐ ऐं ही श्रीं शनैश्चराय नमः।
राहु- ॐ ऐं हीं राहवे नमः।
केतु- ॐ हीं ऐं केतवे नमः।

योगिनीशान्तिमन्त्रः-

मङ्गला—ॐ ह्रीं मंगले मंगलायै स्वाहा। **पिङ्ला**—ॐ ग्लौं पिंगले वैरिकारिणि प्रसीद फट् स्वाहा। **धान्या**—ॐ श्रीं धनदे धान्यायै स्वाहा। **भ्रामरी**—ॐ भ्रामरि जगतामधीश्वरि क्लीं स्वाहा। **भद्रिका**— ॐ भद्रिके भद्रं देहि अभद्रं नाशय स्वाहा। **उल्का**—ॐ उल्के मम रोगं नाशय जृंभय स्वाहा। **सिद्धा**—ॐ हौं सिद्धे मे सर्व मानसं साधय स्वाहा। **संकटा**—ॐ ह्रीं संकटे मम रोगं नाशय स्वाहा।

शत्रुनाशक बगलामुखी प्रयोगः मन्त्र-

ॐ ह्लीं बगलामुखी सर्व दुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

विनियोगः- ॐ अस्य श्री बगलामुखी मन्त्रस्य नारद ऋषिःत्रिष्टुप् छन्दः श्रीबगलामुखी देवता, ह्ली बीजं, स्वाहा शक्तिः, ॐ कीलकं ममाभीष्ट सिद्धयर्थे च शत्रुणां स्तंभनार्थे जपे विनियोगः। **करन्यासः**- ॐ ह्लीं **अंगुष्ठाभ्यां नमः**, ॐश्रीबगलामुखी **तर्जनीभ्यां नमः**, सर्वदुष्टानां **मध्यमाभ्यां नमः**, वाचं मुखं पदं स्तंभय **कवचाय हुम्**। जिह्वां कीलय **कनिष्ठिकाभ्यां नमः**, बुद्धिं विनाशय ह्लीं ॐ स्वाहा **करतलकरपृष्ठाभ्यां नमः**। **षडङ्गन्यासः**- ॐ ह्लीं **हृदयाय नमः**, ॐ श्रीबगलामुखी **शिरसे स्वाहा**, सर्वदुष्टानां **शिखायै वषट्**, वाचं मुखं पदं स्तंभय **कवचाय हुम्**, जिह्वां कीलय **नेत्रत्रयाय वौषट्**, बुद्धिं विनाशय ह्लीं ॐ स्वाहा **अस्त्राय फट्**।
ध्यानः- **सौवर्णासन संस्थिता त्रिनयनां पीतांशुकोल्लासिनीम् हेमाभाङ्गरुचिं शशांक मुकुटां सच्चम्पक स्रग्युताम्। हस्तैर्मुद्गर पाश वज्र रसनाः संबिभ्रतीं भषणै व्याप्ताङ्गीं बगलामुखीं त्रिजगतां संस्तम्भिनीं चिंतयेत्**।।

बगलामुखी शाबर मन्त्र-

शाबर मंत्र शीघ्र प्रभावी होते हैं- **ॐ मलयाचल बगला भगवती महाक्रूरी महाकाली राजमुखबंधनं ग्राम मुखबंधनं ग्राम पुरुमुखबंधनं कालमुख बंधनं चौरमुखबंधनं व्याघ्रमुखबंधनं सर्वदुष्टग्रहबंधनं सर्वजनबंधन वशीकुरु कुरु हुं फट् स्वाहा।**

विष्णु द्वादश अक्षर मन्त्रजप प्रयोग

मन्त्र- ॐ नमो भगवते वासुदेवाय।

विनियोगः-ॐ अस्य श्रीद्वादशाक्षरमन्त्रस्य प्रजापति ऋषिर्गायत्रीछन्दः, श्रीविष्णुः परमात्मा देवता, मम सर्वपापविनाश-पूर्वकं श्रीपरमेश्वरप्रीत्यर्थे जपे विनियोगः। ❖करन्यासः- ॐ अंगुष्ठाभ्यां नमः, नमो तर्जनीभ्यां नमः, ॐ भगवते। मध्यमाभ्यां नमः, ॐ वासुदेवाय अनामिकाभ्यां नमः, ॐ नमो भगवते कनिष्ठिकाभ्यां नमः, ॐ वासुदेवाय करतल करपृष्ठाभ्यां नमः। ❖हृदयादिन्यासः- ॐ हृदयाय नमः, नमो शिरसे स्वाहा, ॐ भगवते शिखायै वषट्, ॐ वासुदेवाय कवचाय हुम्, ॐ नमो भगवते नेत्रत्रयाय वौषट्, ॐ वासुदेवाय अस्त्राय फट्।

❖ध्यानम्- ॐ विष्णु शारदचन्द्रकोटिसदृशं शंखं रथाङ्गदहारकुण्डलं- महामौलिं स्फुरत्कंकणं श्रीवत्सांकमुदार-कौस्तुभधरं वन्दे मनीन्द्रैः स्तुतम्।।

शिवपञ्चाक्षर मन्त्र जप विधिः-

ॐ नमः शिवायः।

विनियोगः- ॐ अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेव ऋषिः, पंक्तिश्छन्दः, सदाशिवो देवता, ॐ बीजं, नमः शक्तिः, शिवायेति कीलकं, चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः।

❖ऋष्यादिन्यासः- ॐ वामदेवऋषये नमः शिरसि, ॐ पंक्तिश्छन्दसे नमः मुखे, ॐ श्रीसाम्बसदाशिवदेवतायै नमः हृदये, ॐ बीजाय नमः गुह्ये, क्षों नमः शक्त्ये नमः पादयोः। ॐ शिवाय कीलकाय नमः सर्वाङ्गे, ❖करदिन्यासः- ॐ ॐ अंगुष्ठाभ्यां नमः, ॐ नं तर्जनीभ्यां नमः, ॐ मं ❖मध्यमाभ्यां नमः, ॐ शिं अनामिकाभ्यां नमः, ॐ वां कनिष्ठिकाभ्यां नमः, ॐ यं करतल करपृष्ठाभ्यां नमः। ❖हृदयादिन्यासः- ॐ ॐ हृदयाय नमः, ॐ नं शिरसे स्वाहा, ॐ मं शिखायै वषट्, ॐ शिं कवचाय हुम्, ॐ वां नेत्रत्रयाय वौषट्, ॐ यं अस्त्राय फट्।

ध्यानम्- ध्यायेन्नित्यं महेशं रजतगिरिनिभं,चारुचन्द्रावतंसं, रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्। पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं, विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।। ॐ नमः शिवाय।

न्यास सहित नवार्ण मन्त्र जपः- ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे।

विनियोगः- ॐ अस्य श्रीनवार्णमन्त्रस्य ब्रह्माविष्णुरुद्रा ऋषयः गायत्र्युष्णिगनुष्टुभश्छन्दांसि, श्रीमहाकालीमहालक्ष्मी महासरस्वत्यो देवताः, ऐं बीजम् ह्रीं शक्तिः, क्लीं कीलकम्, श्रीमहाकाली महालक्ष्मी महासरस्वतीप्रीत्यर्थे जपे विनियोगः।

❖ऋष्यादिन्यासः- ब्रह्माविष्णुरुद्रऋषिभ्यो नमः शिरसि, गायत्र्युष्णिगनुष्टुप्छन्दोभ्यो नमः मुखे, श्रीमहाकाली महालक्ष्मी महासरस्वतीदेवताभ्यो नमः हृदि, ऐं बीजाय नमः गुह्ये, ह्रीं शक्त्ये नमः पादयोः, क्लीं कीलकाय नमः नाभौ, ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे इस मूल मन्त्र से हाथोंकी शुद्धि करके करन्यास करें। ❖करन्यासः- ॐ ऐं अंगुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां नमः,ॐ क्लीं मध्यमाभ्यां नमः, ॐ चामुण्डायै अनामिकाभ्यां नमः, ॐ विच्चे कनिष्ठिकाभ्यां नमः, ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतल करपृष्ठाभ्यां नमः। ❖हृदयादिन्यास-ॐ ऐं हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ क्लीं शिखायै वषट्, ॐ चामुण्डायै कवचाय हुम्, ॐ विच्चे नेत्रत्रयाय वौषट्,ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्। ❖अक्षरन्यास-ॐ ऐं नमः शिखायाम्, ॐ ह्रीं नमः दक्षिणनेत्रे, ॐ क्लीं नमः वामनेत्रे, ॐ चां नमः दक्षिणकर्णे ॐ मुं नमः वामकर्णे, ॐ डां नमः दक्षिणनासापुटे ॐ यैं नमः वामनासापुटे, ॐ विं नमः मुखे, ॐ च्चें नमः गुह्ये। ❖दिङ्न्यासः- ॐ ऐं प्राच्यै नमः। ॐ ऐं आग्नेय्यै नमः, ॐ ह्रीं दक्षिणायै नमः। ॐ ह्रीं नैर्ऋत्यै नमः। ॐ क्लीं प्रतीच्यै नमः। ॐ क्लीं वायव्यै नमः। ॐ चामुण्डायै उदीच्यै नमः। ॐ चामुण्डायै ऐशान्यै नमः। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे भूम्यै नमः।

ध्यानम्- खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः, शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्। नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्।। अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकां, दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्। शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां, सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्। घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं, हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्। गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्।।

मालापूजन- **ऐं ह्रीं अक्षमालिकायै** नमः इस मन्त्र से मालाकी पूजा करके प्रार्थना करे-**ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि। चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।। ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे। जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये।। ॐ अक्षमालाधिपतये सुसिद्धिं देहि देहि सर्वमन्त्रार्थसाधिनि साधय साधय सर्वसिद्धिं परिकल्पय परिकल्पय मे स्वाहा।** इसके बाद ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे इस मन्त्र का जप करे। गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि।। इस श्लोक से भगवति को जप अर्पण करदें।

नवार्णमन्त्र के विविध कामना मन्त्रभेद(षट्कर्म प्रयोग)-मन्त्रों के स्वरूपः-

१. **वषट् ऐं ह्रीं क्लीं चामुण्डायै विच्चे** अमुक(नाम) नामानं वषट् कुरुकुरु स्वाहा। वशीकरण के लिए।

२. **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** देवदत्तं(व्यक्ति नाम) फट् उच्चाटनं कुरुकुरु स्वाहा। उच्चाटन के लिए।

३. **क्लीं क्लीं ॐ ऐं** ह्रीं क्लीं चामुण्डायै विच्चे दवदत्तं(नाम) क्लीं क्लीं मोहनं कुरुकुरु क्लीं क्लीं स्वाहा। सम्मोहन के लिए।

४. **ॐ ऐं ह्रीं क्लीं** चामुण्डायै विच्चे देवदत्तं रं रं खे खे मारयमारय रं रं शीघ्रं भस्मी कुरुकुरु स्वाह। मारण के लिए।

५. ॐ ठं ठं **ॐ ऐं ह्रीं** क्लीं चामुण्डायै विच्चे देवदत्तं ह्रीं वाचं मुखं पदं सतंभयस्तंभय

ह्रीं जिह्वांकीलयकीलय ह्रीं बुद्धिं विनाशयविनाशय ह्रीं **ॐ** ठं ठं स्वाहा। स्तम्भन के लिए।

६. **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** देवदत्तं यं यं शीघ्रमाकर्षय आकर्षय स्वाहा। आकर्षण के लिए।

७. **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** हुं अमुकामुकेन सह विद्वेषणं कुरुकुरु स्वाह । विद्वेषण के लिए।

नवार्ण महामन्त्र स्वरूप- यह महानवार्ण मन्त्र

अचूक फल दायक है इसका न्यासादि पूर्ववत् ही होगा।

ॐ ऐं ह्रीं क्लीं महादुर्गे नवाक्षरीनवदुर्गे नवात्मिके नवचण्डीमहामाये महामोहे महायोगनिद्रे जये मधुकैटभ विद्राविणि महिषासुरमर्द्दिनि धूम्रलोचनसंहंत्रि चंडमुंडविनाशिनि रक्तबीजांतके निशुंभध्वंसिनि शुंभदर्पघ्नि देवि अष्टादशबाहुके कपाल-खट्वांग-शूलखड्ग-खेटकधारिणि छिन्नमस्तक धारिणि रुधिरमांसभोजिनि समस्तभूत प्रेतादियोगध्वंसिनि ब्रह्मेन्द्रादिस्तुते देव मां रक्ष रक्ष मम शत्रून् नाशय नाशय ह्रीं फट् हूँ फट् ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे।

संपुटित पाठ मे होम आहुति विचार-

संपुटित पाठ होम में किसी आचार्य का मत हैं

संपुटे हवनं नास्ति के अनुसार ७०० होम आहुति होगी तो किसी आचार्य के अनुसार संपुट होम आहुति संख्या २१०० होगी। कर्मठगरु- **सम्पुटे हवनं नास्ति प्रत्यहेऽपि तथैव च। नानार्थसिद्धिवैकल्पे होमन्तु विपुलं चरेत्।।** अर्थात् संपुट का हवन नहीं करे परन्तु बहुधा करते हैं, दुर्गाकल्पतरु एवं अनुष्ठान प्रकाश मे आहुति संख्या २१०० स्पष्ट लिखी गई हैं। यथा- **होमकाले बीजसंयोगे दुर्गा मन्त्रेण पृथक् हुनेत्। कामना बीज संयोगो दुर्गा मन्त्रेण हुनेत्।। दुर्गास्तवन मन्त्रांणां संख्यां सप्तशतं भवेत्। कामना मन्त्र संख्या च शतं चैव चतुर्दश।। मध्ये मन्त्रान् सप्तशतं होमकाले तु योजयेत्। पाठे मन्त्रं पुटं वाच्यं होम मन्त्राः पृथक् पृथक्।। होमसंख्या च मन्त्राणां शतं वै चैकविंशतिः। पाठे बीजं पुटं वाच्यं होमे बीज पुटं हुनेत्।** दुर्गापाठ मन्त्र को अगर किसी ऐं, ह्रीं श्री, या किसी बीज मन्त्र से संपुटित किया जाता हैं तो पुटित कामना मन्त्र के अलग होम की आवश्यकता नहीं हैं। बीज मंत्र एकाक्षरी हो या५-७ बीजाक्षर होवे तो भी एक ही आहुति होगी। अतः ७०० आहुति देवे। **अस्त संपुट**- में एक ही आहुति होगी क्यों कि इसमें अंत में कामना मंत्र या बीजाक्षर विलोम होगा। व्याहृति व बीजाक्षररों का संपुट मंत्र के आदि व अंत में लोम विलोम ही लगता है अतः विलोमाक्षर का पृथक् होम नहीं करने पर केवल७०० आहुति देवे। मरणादि मंत्रों में लोम कामना मंत्र फिर दुर्गा मंत्र फिर विलोमाक्षर कामना मन्त्र की आहुति देने पर २१०० आहुति देवे।

निष्कर्स- प्राय उदय संपुट पठ ही करते हैं अर्थात् दुर्गा मन्त्र के आदि-अंत में कामना मंत्र लोम ही लगाते हैं अतः २१०० आहुति देवे।

संपुटित पाठ प्रकार एवं विधि- पाठ मंत्र से आगे पीछे कामना मंत्र लगाने से

संपुटीकरण करते हैं। संपुट पाठ ३ प्रकार के होते हैं। **१.उदय संपुट, २.अस्त संपुट, ३.अर्द्धसंपुट**

१.उदय संपुट- उदय संपुट में कामना मंत्र सप्तशतीपाठ मंत्र के आदि व अंत में लगाया जाता हैं।

२.अस्तसंपुट-अस्तसंपुट बीजमंत्र या कामना मंत्र पाठ के आदि में पढे फिर दुर्गापाठ मंत्र पढे अंत मे कामना मंत्र विलोम रूप से उच्चारण करे यथा- ह्रौं जूं सः ऐं **मार्कण्डेय उवाच** सः जूं ह्रौं। **३.अर्द्धसंपुट**- कामनामंत्र दुर्गापाठ मंत्र के आदि या अन्त में केवल एक बार पढें। इसका फल न्यून हैं परन्तु विपरित प्रभाव नहीं होता है। **प्राय सर्वत्र उदय संपुट का ही प्रचलन है।** ४. **तंत्र मार्ग के अनुसार** व्याहृति व बीजाक्षर का संपुट प्रारंभ में लोम तथा कामना मंत्र इष्ट के बाद विलोम क्रम से होता है तथा इनकी आहुति भी एक ही होती है। **५.मित्रपाद प्रयोग**- मंत्र के चरण भेद मध्य में बीजमंत्र या अन्य मन्त्र के संयोजन से मंत्र उपासना या दुर्गा उपासना कि जा सकती है।

कामनानुसार दुर्गा पाठ के द्वादश क्रमभेद-दुर्गा सप्तशती में तीन चरित्र है,

इनको अलग अलग क्रम से करने पर अलग-अलग कामना फल विशेष रूप से मिलता है। जो निम्न प्रकार हैं-(तन्त्रग्रन्थ एवं निर्णय सिन्धु) **१.महाविद्या क्रम**- प्रथम, मध्यम उत्तर चरित्र- **सर्वकामना हेतु।** **२.महातन्त्री**- उत्तर, मध्यम, प्रथम चरित्र- **शत्रुनाश,लक्ष्मीप्राप्ति हेतु।** **३.चण्डी**- उत्तर, मध्यम, प्रथम चरित्र- **शत्रुनाश।** **४.महाचण्डी**-उत्तर, प्रथम, मध्यम चरित्र- **शत्रुनाश,लक्ष्मीप्राप्ति हेतु।** **५.सप्तशती**- मध्यम,प्रथम,उत्तर चरित्र- **लक्ष्मी व ज्ञान प्राप्ति एवं उत्कीलन।** **६.मृतसंजीवनी**- मध्यम, उत्तर, प्रथम चरित्र- **आरोग्यलाभ।** **७.रूप दीपिका**- प्रथम, उत्तर, मध्यम चरित्र-विजय व आरोग्य। (**रूपं देहि जयं देहि से संपुटित**)। **८.निकुंभला**-मध्यम, प्रथम, उत्तर चरित्र- रक्षा हेतु, विजय हेतु(**शूलेन पाहि नो देवि से संपुटित**)। **९.योगिनी**- बालोपद्रव शमन। (**प्रत्येक चरित्र से पहले सम्बंधित योगनियों का पाठ एवं प्रत्येक मंत्र को यं शं षं सम्पुटित**)। **१०.विलोम(संहार क्रम)**-७०१ वें श्लोक से प्रथम श्लोक तक विलोम क्रम से। **११.अक्षरशः विलोम पाठ**- १३ वें अध्याय से प्रथम अध्याय तक काशी के पुराने विद्वानों के पास मिल सकती है१०० वर्ष पहले छपी हुई है। इसी तरह प्रत्येक चरित्र के पहले भैरव नामावलि पाठ का विधान भी मिलता। गढ़वाल क्षेत्र व अन्य सम्प्रदायों में हर अध्याय पहले भैरव नामावलि का पाठ करने का क्रम भी मिलता है। कई विद्वान कहते है कि सप्तशती के बाहर के मंत्र का संपुट नहीं लग सकता, परन्तु योगिनी क्रम से यह साफ जाहिर है कि अन्य मंत्रों के संपुट लग सकते हैं। दुर्गा सप्तशती के सभी दशमहाविद्याओं के मंत्र, गायत्री मन्त्र, भागवत के मन्त्रों का, वैदिक मंत्रों का व अन्य कई मंत्रों का संपुट लगाया जा सकता है। दुर्गार्चनसृतिः, अनुष्ठान प्रकाश में दुर्गा के बाहर के मन्त्रों के संपुट के विषय में लिखा है। स्वयं रावण भी निकुंभला का उपासक था वह भी सप्तशतीक्रम से पाठन **शूलेन पाहिनो..**। का संपुट लगाता था।

दुर्गापाठ मे निषिध आहुति विचार-

चण्डी स्तवे प्रतिश्लोकमेकाहुतिरिहेष्यते। रक्षा कवचागैमन्त्रै तत्र न कारयेत्।। अर्थात्- १.कवच मंत्र एवं अस्त्र शस्त्र मंत्रों का हवन नहीं होता हैं। वैसे अगर कवच सिद्ध करना हो तो गुग्गुल व घृत से होम करे। क्यो कि घृत से अग्नि का आचमन होता है। २.सौभाग्य द्रव्य सिन्दुरादि का भी होम नही होता है मरण कर्म में सिन्दुरादि से हवन अश्वय होता हैं उसमें तो अग्नि का १६वां मृतक संस्कार कुण्डानि का होता है पश्चात् विधि होम प्रारम्भ होता है। ३. चतुर्थ अध्याय के **शूलेन पाहिनो देवि** इत्यादि चार मन्त्रो का हवन नही होता, इसी तरह **खड्गिनी शूलिनी** मन्त्र का भी उच्चारण कर हवन नही करना चाहिए उक्त मन्त्र के स्थान पर **नवार्ण मन्त्र** अथवा **श्री महालक्ष्म्यै स्वाहा** से हवन करें अथवा मन्त्र को मानसिक उच्चारण कर हवन करें।४. पांचवे अध्याय में **दूत उवाच** दो बार आया हैं इस मन्त्र से आहुति देने से फल का भाग दूत को जाता हैं अतः कर्मफल में न्यूनता आती हैं। अतः मनसा पढकर **ऐं सरस्वत्यै नमः** से आहुति प्रदान करें।

दुर्गासप्तशती के प्रति अध्याय के अन्त मे महा आहुति विधान-

प्रति अध्याय के अन्त में आहुति समय स्रुक पर आहुति द्रव्य रखकर मंत्र से आहुति देवे। पश्चात् घी की आहुति इन मन्त्रो से देवे। घृताहुति के मन्त्र तो एक ही है, महाहुति क्रम अलग अलग हैं। घृत आहुति मंत्र- **ॐ घृतं घृतपावानः पिबत वसां वसापावानः। पिबतान्तरिक्षस्य हविरसि स्वाहा दिशः प्रदिशः आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा।**

प्रथम-अध्याय-एक पान पर कपित्थफल,मधु, कमलगट्टा,गुगल, शाकल्य, गंधाक्षत्, पुष्प, लौंग, इलायची सब एक साथ लेवे। सुपारी रखे घी से भिगाये एवं स्रुक में रखकर खड़े होकर निम्न मन्त्र से आहुति देवे-**मन्त्र-** नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।। **अथवा** ॐ जयन्ती मंगला काली भद्रकाली कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते।। साङ्गायै सपरिवारायै सवाहनायै सायुधायै वाग्भव बीजाधिष्ठात्र्यै महाकाल्यै महाहुतिं समर्पयामि नमः स्वाहा।

द्वितीय-अध्याय :- हवनीयद्रव्य- पान, कमलगट्टा, गुगल, नारिकेलखण्ड, पुष्प, लौंग, इलायची, शाकल्य, सुपारि- **नमो देव्यै महादेव्यै** ......अथवा **ॐ जयन्ती मंगला ....साङ्गायै सपरिवारायै सवाहनायै सायुधायै सशक्त्यै अष्टाविंशति वर्णात्मिकायै लक्ष्मी बीजाधिष्ठात्र्यै श्रीमहालक्ष्मी भुवनेश्वरी देवतायै महाहुतिं समर्पयामि नमः स्वाहा।** **तृतीय-अध्यायः-** पान, बिजोरा, चंदन, नीमगिलोय, दधि, माष, मधु, भैंसागुग्गल, कमलगट्टा, लौंग२, इलायची२, सुपारी, शाकल्य, पुष्प, फल लेकर महाहुति देवे- **नमो देव्यै महादेव्यै** ......अथवा **ॐ जयन्ती मंगला ....साङ्गायै सपरिवारायै सशक्त्यै सायुधायै अष्टाविंशति वर्णात्मिकायै लक्ष्मी बीजाधिष्ठात्र्यै श्रीमहालक्ष्यै महाहुतिं समर्पयामि नमः स्वाहा।** **चतुर्थ-अध्याय**-द्रव्य-पान, शाकल्य, पायस, कमलगट्टा, बिल्वफल, लौंग, इलायची, गुग्गल, फल, पुष्प, **मन्त्र-नमो देव्यै महादेव्यै** ......अथवा **ॐ जयन्ती मंगला ....साङ्गायै सपरिवारायै सवाहनायै सशक्त्यै सायुधायै श्री लक्ष्मीबीज अधिष्ठात्र्यै। त्रिवर्णात्मिकायै श्री महालक्ष्यै महाहुतिं समर्पयामि नमः स्वाहा।** **पञ्चम-अध्याय-** द्रव्य- पान, शाकल्य, लौंग, इलायची, सुपारी, गुगल, कमलगट्टा, कपूर, श्वेतचन्दन, पुष्प, फल, बिल्वफल,बिजौरा। **मन्त्र- नमो देव्यै महादेव्यै** ......अथवा जयन्ती मंगला **....सांगा. सप. सवा.सश. सायु. शताक्ष्यै श्री धूम्राक्षी देवतायै महाहुतिं समर्पयामि नमः स्वाहा।** **षष्ठ-अध्यायः-** द्रव्य- पान, शाकल्य, कमलगट्टा, गुग्गल, भोजपत्र, कुष्माण्डखण्ड, नारंगी, नारिकेलखण्ड, फल, पुष्प **मन्त्र-नमो देव्यै महादेव्यै** .....अथवा जयन्ती मंगला .. **..सांगा. सप. सवा.सश. सायु. शताक्ष्यै श्री धूम्राक्षी देवतायै महाहुतिं समर्पयामि नमः स्वाहा।** **सप्तम-अध्यायः**-द्रव्य-पान, शाकल्य, लौंग, इलायची, सुपारी, चिरौंजी, लाजवन्ती, पुष्प, कमलगट्टा, जयफल, कुष्माण्ड- फलखण्ड, कर्पूर- **मन्त्र- नमो देव्यै महादेव्यै** . **....जयन्ती मंगला ....सांगा. सप. सवा. श्रीकर्पूर बीजाधिष्ठात्र्यै श्री धूम्राक्षी काली चामुण्डा देवता महाहुतिं समर्पयामि नम स्वाहा।**

अष्टम-अध्यायः-द्रव्य-पान, शाकल्य,कमलगट्टा, लौंग, इलायची, सुपारी, फल, गुग्गल, कुष्माण्डखण्ड, लालचन्दन, मधु, पुष्प- **मन्त्र- नमो देव्यै महादेव्यै ...... जयन्ती मंगला ....सांगा. सप. सवा. सश.सायु. अष्टमातृकासंहितायै रक्ताक्ष्यै देव्यै महाहुतिं समर्पयामि नमः स्वाहा।** **नवम-अध्याय-** द्रव्य-पान, शाकल्य,कमलगट्टा, लौंग, इलायची, सुपारी, बिजौरा नींबू,फल, कुष्माण्डखण्ड, इक्षुखण्ड, बिलवफल,मनफल- **मन्त्र- नमो देव्यै महादेव्यै ...... जयन्ती मंगला ....सांगा. सप. सवा. सश.सायु. श्री वाग्भव बीजाधिष्ठात्र्यै भगवति महाकाल्यै तारादेव्यै नमः महाहुतिं समर्पयामि नमः स्वाहा।** **दशम-अध्याय-** द्रव्य-पान, शाकल्य,कमलगट्टा, लौंग, इलायची, सुपारी, बिजौरा, कस्तूरी, गुग्गल,फल, कुष्माण्डखण्ड, पुष्प, मेनसिल, बिलवफल,मेनसिल- **मन्त्र- नमो देव्यै महादेव्यै ...... जयन्ती मंगला ....सांगा. सप. सवा. सश.सायु. सिंहवाहनायै शूलपाशधारिण्यै अंबिका भैरवी देव्यै महाहुतिं समर्पयामि नमः स्वाहा।**

एकादश-अध्याय-द्रव्य-पान, पुष्प, फल, शाकल्य, लौंग, इलायची, कर्पूर, शर्करा, कमलगट्टा, सुपारी, मिश्री, पायसान्न, गुग्गल, इक्षुखण्ड, दाडिमफल **मन्त्र- नमो देव्यै महादेव्यै ...जयन्ती मंगला ...सांगा. सप. सवा. सश.सायु. सर्वनारायण्यै शक्त्यै महाहुतिं समर्पयामि नमः स्वाहा।** **द्वादशदश-अध्याय-** द्रव्य- पान, शाकल्य, लौंग, इलायची, सुपारि, अगर,कस्तूरी, कमलगट्टा, पत्र, पुष्प, फल, जायफल, बिल्वफल, मिश्री, पायसान्न **मन्त्र- नमो देव्यै महादेव्यै..जयन्ती मंगला..सांगा. सप.सवा.सश.सायु.श्री बालात्रिपुरसुन्दर्यै महाहुतिं समर्पयामि नमः स्वाहा।** **त्रयोदश-अध्याय**-द्रव्य-पान, शाकल्य, लौंग, इलायची, सुपारि, बिल्वफल, गूग्गल, कमलगट्टा, फल, समीपत्र, कदलीफल, श्वेतार्कपुष्प, कसर, कर्पूर, श्वेतपुष्प, नारिकेलखण्ड, पुष्प, **मन्त्र-नमो देव्यै महादेव्यै ... जयन्ती मंगला ..सांगा. सप. सवा. सश.सायु.** श्री महात्रिपुरसुन्दर्यै महाहुतिं समर्पयामि नमः स्वाहा।

।। शत्रुनाशक बगला माला मन्त्र।।

ॐ नमो भगवति ॐ नमो वीरप्रतापविजयभगवति बगलामुखि मम सर्वनिन्दकानां सर्वदुष्टानां वाचं मुखं पदं गतिं स्तम्भय स्तम्भय ब्रह्मीं मुद्रय मुद्रय बुद्धिं विनाशय विनाशय, अपराबुद्धिं कुरु कुरु,आत्म विरोधिनां शत्रूणां शिरो ललाट मुख नेत्र कर्ण नासिकोरु पद अणुरेणु दन्तोष्ठ जिह्वा तालु गुह्य गुद कटि जानु सर्वाङ्गेषु केशादिपादपर्यन्तं पादादिकेशपर्यन्तं स्तम्भय स्तम्भय, खें खीं मारय मारय, परमन्त्र परतन्त्राणि छेदय छेदय, आत्ममन्त्रयन्त्रतन्त्राणि रक्ष रक्ष, सर्वग्रहं निवारय, व्याधिं विनाशय विनाशय दुःखं हर हर, दारिद्र्यं निवारय निवारय, सर्वमन्त्र-स्वरूपिणि, सर्वतन्त्रस्वरूपिणि, सर्वशिल्प-प्रयोग- स्वरूपिणि, सर्वतत्वस्वरूपिणि, दुष्टग्रह भूतग्रह आकाशग्रह पाषाणग्रह सर्वचाण्डालग्रह यक्षकिन्नर -किम्पुरुषग्रह भूतप्रेतपिशाचानां शाकिनी डाकिनीग्रहाणां पूर्वदिशां बन्धय बन्धय वार्तालि मां रक्ष रक्ष दक्षिणदिशां बन्धय बन्धय, किरातवार्तालि मां रक्ष रक्ष, पश्चिमदिशा बन्धय बन्धय, स्वप्नवार्तालि मां रक्ष रक्ष उत्तरदिशां बन्धय बन्धय, कालि मां रक्ष रक्ष ऊर्ध्वदिशं बन्धय बन्धय, उग्रकालि मां रक्ष रक्ष, पातालदिशं बन्धय बन्धय, बगलापरमेश्वरि मां रक्ष रक्ष, सकलरोगान् विनाशय विनाशय, सर्वशत्रून् पलायनाय पञ्चयोजनमध्ये राजजनस्त्रीवशतां कुरु कुरु शत्रून् दह दह, पच पच स्तम्भय, मोहय मोहय, आकर्षय आकर्षय, मम शत्रून् उच्चाटय, उच्चाटय हुं फट् स्वाहा।

।। इति बगलामालामन्त्रः।।

श्रीसूक्त

विनियोगः— ॐ अस्य श्रीसूक्तस्य आनन्द कर्दम चिक्लीथ ऋषि, अग्निदेवताः आदौत्रयस्य अनुष्टुप् छंदः शेषांसा प्रसार पंक्तिः, त्रिष्टुप्,अनुष्टुप् पुनः प्रसार पंक्तिश्छंदः, हिरण्य वर्णा बीजं, तां आवह इति शक्ति कीर्तिमृद्धिं ददातु इति कीलकं श्री महालक्ष्मी वर प्रसाद सिद्ध्यर्थं पाठे जपे विनियोगः।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह।१।।
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरूषानहम् ।। २।।
अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम् ।
श्रियं देवीमुप ह्वये श्रीर्मा देवी जुषताम् ।। ३।।
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियम्।। ४।।
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे।।५।।
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्या अलक्ष्मीः।।६।।
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे।।७।।
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वांनिर्णुद मे गृहात् ।। ८।।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम् ।।९।।
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।।१०।।
कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।११।।
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले ।।१२।।
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह ।।१३।।
आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो म आ वह ।।१४।।
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्।।१५।।
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्।।१६।।
पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि सं नि धत्स्व।।१७।।
पद्मानने पद्मऊरू पद्माक्षि पद्मसम्भवे। तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम्।।१८।। अश्वदायि गोदायि धनदायि महाधने। धनं मे जुषतां देवि सर्वकामांश्च देहि मे।।१९।।
पुत्रपौत्रधनं धान्यं हस्त्यश्वाश्वतरी रथम् । प्रजानां भवसि माता आयुष्मन्तं करोतु मे।।२०।। धनमग्नि र्धनं वायुर्धनं सूर्यो धनं वसुः। धनमिन्द्रो बृहस्पतिर्वरुणो धनमश्विना।।२१।। वैनतेय सोमं पिब सोमं पिबतु वृत्रहा। सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः।।२२।। न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः। भवन्ति कृतपुण्यानां भक्त्या श्रीसूक्तजापिनाम ।।२३।। सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम्।।२४।। विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्। लक्ष्मीं प्रियसखीं भूमिं नमाम्यच्युत–वल्लभाम्।।२५।। महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो लक्ष्मीः प्र चोदयात्।।२६।। आनन्दः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः। ऋषयः श्रियः पुत्राश्च श्रीर्देवीर्देवता मताः।।२७।। ऋणरोगादि– दारिद्र्यपापक्षुदपमृत्यवः भयशोकमनस्तापा नश्यन्तु मम सर्वदा।।२८।।
श्रीर्वर्चस्वमायुष्य– मारोग्य–माविधाच्छोभमानं महीयते।
धनं धान्यं पशु बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः।।२९।।

।। ऋग्वेदोक्तं श्रीसूक्तं सम्पूर्णम्।।

चमत्कारी लक्ष्मी महामन्त्र प्रयोग विधि-

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः।।

विनियोगः- अस्य श्रीमहालक्ष्मीमन्त्रस्य ब्रह्माऋषि गायत्री छन्दः, महालक्ष्मी देवता, श्रीं बीजं ह्रीं शक्तिः सर्वार्थसिद्धये जपे विनियोगः।(एक अर्घांजल छोड़ दें)।

ऋष्यादिन्यास- ॐ ब्रह्मणे ऋषये नमः शिरसि, गायत्रीछन्दसे नमः **मुखे,** ॐ महालक्ष्मीदेवतायै नमः हृदये, ॐ श्रीं बीजाय नमः **गुह्ये,** ॐ ह्रीं शक्तये नमः पादयोः।

करन्यास-

ॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रींश्रीं **अंगुष्ठाभ्यां नमः,**
ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं **तर्जनीभ्यां नमः,**
ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं **मध्यमाभ्यां नमः,**
ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं **अनामिकाभ्यां नमः,**
ॐ श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं **कनिष्ठाभ्यां नमः,**
ॐ श्रीं ह्रीं श्रीं नमःश्रीं ह्रीं श्रीं **करतलकरपृष्ठाभ्यां नमः,**
करन्यासःॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं **हृदयाय नमः,**
ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं **शिरसे स्वाहा,**
ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं **शिखायै वषट्,**
ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं **कवचाय हुम्।**
ॐ श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं **नेत्रत्रयाय वौषट्।**
ॐ श्रीं ह्रीं श्रीं नमः श्रीं ह्रीं श्रीं **अस्त्राय फट्।**

ध्यान-सिन्दूरारूणकान्तिमब्जवसतिं सौन्दर्यवारां निधिं, कोटी-रांगद-हार- कुण्डल-कटी- सूत्रादि- भिर्भूषिताम्।। हस्ताब्जैर्वसुपात्राब्जयुगलादर्शी वहन्तीं परा,मावीतां परिचारिकाभिरनिशं ध्यायेत्प्रियां शारङ्गिणः।।

दीपावली या किसी शुभ मुहूर्त मे (धन– धान्यादि कृष्यर्थं श्रीमहालक्ष्म्याः पूजनं तथा जप करिष्ये या कारिष्ये)लक्ष्मी जी का विधिवत् पूजनादि कर जप करना चाहिए यदि केवल दीपावली दिन ही करना चाहते हैं तो ११००० जप कर अन्तमे दशांश हवन,तर्पण,मार्जनोपरान्त पूर्णाहुति दें उत्तरपूजन आरती कर यथा ज्ञान सन्तुष्ट करने से लक्ष्मी जी साक्षात् निवास करतें हैं। **जपमाला**–स्फटिक/कमलगट्टा। जप **संख्या**–११०० प्रतिदिन। **पुरश्चरण**–१,२५,०००। हवन द्रव्य–घी,शहद एवं शक्कर से युक्त बेलफल।

॥ पुरुषसूक्त ॥

ॐ सहस्त्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भुमिँ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदँ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २॥
एतावानस्य महिमातो ज्यायाँश्च पूरूषः ।
पादोऽस्य विश्वा भुतानि त्रिपादस्यामृतं दिवि॥ ३॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४॥
ततो विराडजायत विराजो अधि पूरुष ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५॥
तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६॥
तस्माद्यज्ञात् सर्वहुत ऋचः साभानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७॥
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः॥ ८॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरूषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते। १०
ब्राह्मणोऽस्य मुखमासीदबाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याँ शूद्रो अजायत। ११॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२॥
नाभ्या आसीदन्तरिक्षँ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भुमिर्दिशः श्रोत्रात्तथा लोकाँ२अकल्पयन्। १३।
यत्पुरूषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४॥
सप्तास्यासन् परिधयस्त्रि सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पुर्वे साध्याः सन्ति देवाः॥ १६॥

॥ इति पुरुष सूक्तम्॥

॥ रूद्रसूक्त ॥

ॐ नमस्ते रूद्र मन्यव उतो त इषवे नमः ।
बाहुभ्यामुत ते नमः ॥
या ते रूद्र शिवा तनुरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरू मा हिँसीः पुरूषं जगत्।
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मँ सुमना असत् ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जभयन्त्सर्वाश्च यातुधन्योऽधराचीः परा सुव ॥
असौ यस्ताम्रो अरूण उत बभ्रुः सुमङ्गलः ।
ये चैनँ रूद्रा अभितो दिक्षु श्रिताः सहस्त्रशोऽवैषाँ हेड ईमहे ॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृश्रनदृश्रन्नुदहार्यः स दृष्टोमृडयाति नः ॥
नमोऽस्तु नीलग्रीवाय सहस्त्राक्षाय मीढुषे ।
अथो ये अश्य सत्वानोऽहं तेभ्योऽकरं नमः ॥
प्रमुञ्च धन्वनस्त्वमुभयोरात्र्योर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ उत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
अथो य इषुधिस्तवारे अस्मन्नि धेहि तम्॥
अवतत्य धनुष्ट्वँ सहस्त्राक्षशतेषुधे ।
निशीर्यशल्यानां मुखा शिवो नः सुमना भव ॥
नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥
मा नो महान्तमुत मा नो
अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत
मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥
मा नस्तोके तनये मान आयुषि
मा नो गोषु मानो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो
वधीर्हविष्मन्तः सदमित्वा हवामहे ।१६॥

सङ्कटा–स्तुतिः

प्रयोजन—महालक्ष्मी, महासरस्वती व महाकाली की कृपा तथा दर्शन कराने वाला अमोघ व परम तेजस्वी स्तोत्र। इसी स्तोत्र द्वारा महाकवि कालिदास ने मां भद्रकाली की उपासना कर साक्षात् दर्शन किये थे तथा वेद उपनिषदों का ज्ञान आशीर्वाद स्वरूप पाकर ज्ञानियों मे सर्वश्रेष्ठ ज्ञानी हुए थे।)

अयि गिरि–नन्दिनि नन्दित–मेदिनि विश्व–विनोदिनि नन्दिनुते
गिरिवर-विन्ध्य-शिरोऽधि-निवासिनि विष्णु-विलासिनि जिष्णुनुते।
भगवति हे शितिकण्ठ–कुटुम्बिनि भूरि–कुटुम्बिनि भूतिकृते ।
जय जय हे महिषासुर–मर्दिनि रम्यकपर्दिनि शैलसुते ।१॥
सुर–वरवर्षिणि दुर्धर–धर्षिणि दुर्मुख–मर्षिणि हर्षरते
त्रिभुवन–पोषिणि शंकरतोषिणि कल्मषमोषिणि घोषरते।
दनुज–निरोषिणि दुर्मदशोषिणि दुर्मुनिरोषिणि सिन्धुसुते
जय जय हे महिषासुर–मर्दिनि रम्यकपर्दिनि शैलसुते।।२॥
अयि जगदम्ब कदम्बवन–प्रियवासिनि तोषिणि हासरते
शिखरि–शिरोमणि–तुङ्ग–हिमालय–शृङ्ग–निजालय–मध्यगते।
मधु–मधुरे मधु कैटभ–गञ्जिनि महिष–विदारिणि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।३॥
अयि निजहुंकृति–मात्रनिराकृत–धूम्रविलोचन – धूम्रशते
समरविशोषित–रोषित–शोणित–बीजसमुद्भव–बीजलते।
शिव-शिव शुम्भ-निशुम्भ-महाहव-तर्पित–भूत–पिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।४॥
अयि शतखण्ड–विखण्डित–रुण्ड– वितुण्डित–शुण्ड–गजाधिपते
निजभुजदण्ड- निपातितचण्ड विपाटित–मुण्ड–भटाधिपते।
रिपुगजगण्ड–विदारण–चण्डपराक्रम–शौण्ड–मृगाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।५॥
धनुरनुषङ्गसुर–रणक्षणसङ्ग–परिस्फुरदङ्ग–नटत्कटके
कनक–पिशङ्ग–पृषत्कनिषङ्ग–रसद्भटशृङ्ग–हताबटुके
हत–चतुरङ्ग–बल–क्षितिरङ्ग–घटद्-बहुरङ्ग-रटद् -बटुके
जय जय हे महिषासुर–मर्दिनि रम्यकपर्दिनि शैलसुते।।६॥
अयि रणदुर्मद–शत्रुवधाद्धुर–दुर्धर– निर्भर– शक्तिभृते
चतुर-विचार-धुरीण -महाशय - दूतकृत-प्रमथाधिपते
दुरित–दुरीह–दुराशय– दुर्मति–दानवदूत–दुरन्तगते
जय जय हे महिषासुर–मर्दिनि रम्यकपर्दिनि शैलसुते।।७॥
अयि शरणागत–वैरिवधूजन– वीरवराभय–दायिकरे
त्रिभुवनमस्तक–शूलविरोधि–शिरोधिकृतामल – शूलकरे
दुमिदुमितामर–दुन्दुभिनाद–मुहुर्मुखरीकृत–दिङ्निकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।८॥
सुरललना–ततथेयित–थेयित–थाभिनयोत्तर–नृत्यरते
कृतकुकुथा–कुकुथोदि–डदादिक–तालकुतूहल– गानरते।
घुघुकुट-घूघुट–घिन्धि–मितध्वनि–घोरमृदङ्ग –निनादरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।९॥
जय जय जाप्यजये जयशब्द–परस्तुति-तत्पर- विश्वनुते
झणझण-झिंमझिम-झिंकृत-नूपुर- शिञ्जित-मोहित-भूतपते।
नटितनटार्ध- नटीनटनायक-नाटन-नाटित-नाट्यरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।१०॥
अयि सुमनः-सुमनः-सुमनः-सुमनः सुमनोरमकान्तियुते
श्रितरजनी-रजनी-रजनी- रजनी- रजनीकर - वक्त्रभृते।
सुनयन-विभ्रमर-भ्रमर-भ्रमर-भ्रमर-भ्रमराभिदृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।११॥
महित-महाहव-मल्ल-मतल्लिक-वल्लित-रल्लित-भल्लिरते
विरचितवल्लि-कपालिक पल्लिक-झिल्लिक-भिल्लिक-वर्गवृत
श्रुतकृत फुल्ल- समुल्ल सितारुण-तल्लज-पल्लव-सल्ललिते
जय जय हे महिषासुर-मर्दिनि रम्यकपर्दिनि शैलसुते।।१२॥
अयि सुदतीजन-लालस-मानस-मोहन- मन्थरराजसुते
अविरल- अगण्ड- गलन्- मदमेदुर- मत्त- मत्तङ्गजराजगते
त्रिभुवन-भूषण-भूत-कलानिधिरूप- पयोनिधि - राजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।१३॥
कमल- दलामल- कोमलकान्ति-कलाकलितामल - भालतले
सकल- विलास- कलानिलय- कलाकलिचलत्- कलहंसकुले
अलिकुल-सङ्कुल-कुन्तल-मण्डल-मौलिमिलद्–बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।१४॥
करमुरलीरव– वर्जित– कूजित –लज्जित–कोकिल–मञ्जुमते

मिलित—मिलिन्द—मनोहरगुञ्जित—रञ्जित—शैल— निकुञ्जगते
निजगण—भूतमहा—शबरीगण —रङ्गणसम्भृत —केलिरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।।१५।।
कटितटपीत — दुकूलविचित्र —मयूख—तिरस्कृत —चण्डरुचे
जितकनकाचल — मौलिमदोर्जित-गर्जित-कुञ्जर-कुम्भकुचे।
प्रणत—सुराऽसुर—मौलिमणि—स्फुरदंशुलसन्नखचन्द्ररुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।। १६ ।।
विजित— सहस्त्रकरैक — सहस्त्रकरैक — सहस्त्रकरैकनुते
कृतसुरतारक — सङ्गरतारक — सङ्गरतारक — सूनुसुते
सुरथसमाधि — समानसमाधि— समानसमाधि—सुजाप्यरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।। १७ ।।
पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत्।
तव पदमेव परं पदमस्त्विति शीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।। १८ ।।
कनकलसत् — कलशीक जलै रनुषिञ्चति तेऽङ्गणरङ्गभुवं
भजति स किं न शची-कुच -कुम्भ-नटीपरिरम्भ—सुखानुभवम्
तव चरणं शरणं करवाणि सुवाणि पथं मम देहि शिवं
जय जय हे महिषासुर—मर्दिनि रम्यकपर्दिनि शैलसुते।। १९ ।।
तव विमलेन्दुकलं वदनेन्दुमलं कलयन्न नुकूलयते
किमु पुरुहूत—पुरीन्दुमुखी— सुमुखीभिरसौ विमुखीक्रियते।
मम तु मतं शिवमानधने भवती कृपया किमु न क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।। २० ।।
अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननीति यथाऽसि मयाऽसि तथाऽनुमतासि रमे ।
यदुचितमत्र भवत्पुरगं कुरु शाम्भवि देवि दयां कुरु मे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते।। २१ ।।
स्तुतिमिमां स्तिमितः सुसमाधिना, नियमतो यमतोऽनुदिनं पठेत्
परमया रमया स निषेव्यते परिजनोऽरिजनोऽपि च तं भजेत्।। २२ ।।

।। इति श्रीसङ्कटा—स्तुतिः सम्पूर्णा।।

भवान्यष्टकम्

न तातो न माता न बन्धुर्न दाता,
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।१।।
भवाब्धावपारे महादुःखभीरुः
प्रपात प्रकामी प्रलोभी प्रमत्तः ।
कुसंसारपाशप्रबद्धः सदाहं।
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।२।।
न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रम् ।
न जानामि पूजां न च न्यासयोगम्।
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।३।।
न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातः
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।४।।
कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः।
कुदृष्टिः कुवाक्यप्रबन्धः सदाहम्
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।५।।
प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित्।
न जानामि चान्यत् सदाहं शरण्ये
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।६।।
विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रुमध्ये।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।७।।
अनाथो दरिद्रो जरारोगयुक्तो
महाक्षीणदीनः सदा जाड्यवक्त्रः।
विपत्तौ प्रविष्टः प्रणष्टः सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि।।८।।

रुद्राष्टक

नमामीशमीशान निर्वाणरूपं
विभुं व्यापकं ब्रह्म वेदस्वरूपं ।
निजं निर्गुणं निर्विकल्पं निरीहं
चिदाकाशमाकाशवासं भजेऽहम्।।१।।
निराकारमोङ्कारमूलं तुरीयं
गिरा ज्ञान गोतीतमीशं गिरीशं ।
करालं महाकाल कालं कृपालं
गुणागार संसारपारं नतोऽहम्।।२।।
तुषाराद्रि संकाश गौरं गभीरं
मनोभूत कोटि प्रभा श्री शरीरं ।
स्फुरन्मौलि कल्लोलिनी चारु गंगा
लसद्भालबालेन्दु कण्ठेभुजंगा।।३।।
चलत्कुंडलं भ्रू सुनेत्रं विशालं
प्रसन्नाननं नीलकण्ठं दयालं ।
मृगाधीशचर्माम्बरं मुण्डमालं।
प्रियं शंकरं सर्वनाथं भजामि।।४।।
प्रचण्डं प्रकृष्टं प्रगल्भं परेशं
अखण्डं अजं भानुकोटिप्रकाशं
त्रयः शूल निर्मूलनं शूलपाणिं
भजेऽहं भवानीपतिं भावगम्यम्।।५।।
कलातीत कल्याण कल्पान्तकारी
सदा सज्जनानन्ददाता पुरारी ।
चिदानंद संदोह मोहापहारी
प्रसीद प्रसीद प्रभो मन्मथारी।।६।।
न यावद् उमानथ पादारविन्दं
भजंतीह लोके परे वा नराणाम्।
न तावत्सुखं शान्ति सन्तापनाशं
प्रसीद प्रभो सर्वभूताधिवासम्।।७।।
न जानामि योगं जपं नैव पूजां।
नतोऽहं सदा सर्वदा शम्भु तुभ्यं ।
जरा जन्म दुःखौघ तातप्यमानं
प्रभो पाहि आपन्नमामीश शंभो।।८।।
रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतोषये।
ये पठन्ति नराः भक्त्या तेषां शम्भुः प्रसीदति।।९।।
इति श्रीगोस्वामितुलसीदासकृतं श्रीरुद्राष्टकं सम्पूर्णम्।

श्रीकालभैरवाष्टकम्

देवराजसेव्यमानपावनाङ्घ्रिपङ्कजं
व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादियोगिवृन्दवन्दितं दिगम्बरं
काशिकापुराधिनाथकालभैरवं भजे।। १ ।।
भानुकोटिभास्वरं भवाब्धितारकं परं
नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
कालकालमम्बुजाक्षमक्षशूलमक्षरं
काशिकापुराधिनाथकालभैरवं भजे।। २ ।।
शूलटङ्कपाशदण्डपाणिमादिकारणं
श्यामकायमादिदेवमक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं
काशिकापुराधिनाथकालभैरवं भजे।। ३ ।।
भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं
भक्तवत्सलं स्थितं समस्तलोकविग्रहम् ।
विनिक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं
काशिकापुराधिनाथकालभैरवं भजे।। ४ ।।
धर्मसेतुपालकं त्वधर्ममार्गनाशकं
कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्णशेषपाशशोभिताङ्गमण्डलं
काशिकापुराधिनाथकालभैरवं भजे।। ५ ।।
रत्नपादुकाप्रभाभिरामपादयुग्मकं
नित्यमद्वितीयमिष्टदैवतं निरञ्जनम् ।
मृत्युदर्पनाशनं करालद्रंष्ट्रमोक्षणं
काशिकापुराधिनाथकालभैरवं भजे।। ६ ।।
अट्टहासभिन्नपद्मजाण्डकोशसन्ततिं
दृष्टिपातनष्टपापजालमुग्रशासनम् ।
अष्टसिद्धिदायकं कपालमालिकन्धरं
काशिकापुराधिनाथकालभैरवं भजे।। ७ ।।
भूतसंघनायकं विशालकीर्तिदायकं
काशिवासलोकपुण्यपापशोधकं विभुम्।
नीतिमार्गकोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथकालभैरवं भजे।। ८ ।।
कालभैरवाष्टकं पठन्ति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम्। शोकमोहदैन्यलोभकोपतापनाशनं ते प्रयान्ति कालभैरवाङ्घ्रिसंनिधिं ध्रुवम्।।
।। श्रीमच्छङ्कराचार्यविरचित कालभैरवाष्टकं सम्पूर्णम्।।

मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् ।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम्।।१।।
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम् ।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।२।।
वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम्।।३।।
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम् ।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम्।।४।।
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम् ।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम्।।५।।
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं धुराधिपतेरखिलं मधुरम्।।६।।
गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम् ।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम्।।७।।
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम्।।८।।
।। इति श्रीमद्वाल्लभाचार्यकृतं मधुराष्टकं सम्पूर्णम्।।

श्रावणकृष्णपक्षः

शक १९४१, संवत्२०७६, सन् १४२७, दक्षिणायनं, उत्तरगोलः, वर्षा ऋतुः, [illegible] अशुद्धः।
दिनांक १७ जुलाई तः १ अगस्त यावत् सन् २०१९ ई। मार्गी [illegible] गुरु-शनी, मार्गी पूर्वास्त शुक्र।

तिथयः	दिनानि	तिथिमानानि द. प.	घं. मि.	नक्षत्र	समा.कालः द. प.	घं. मि.	योगाः	समा.कालः द. प.	करण द. प.	चन्द्रराशयः राशिः द. प.	घ. मि.	राश्यादिस्पष्टसूर्यः	दिनमानं द. प.	सूर्योदयः घं. मि.	सूर्यास्तः घं. मि.	रा.	दिनांका ने.	अं.
१	बु.	५४।५१	रा.३।११	उत्तराषाढ़ा	४३।३०	रा.१०।३६	विष्कुम्भ	५७।१८	बालव २४।२१	मकर	अहोरात्रं	३।००।१७।४३	३३।४४	५।१५	६।४५	२६	१	१७
२	गु.	५८।५३	रा.४।४८	श्रवण	४८।५७	रा.१२।५०	प्रीति	५८।१०	तैतिल२६।५२	मकर	अहोरात्रं	३।०१।१४।४२	३३।४३	५।१५	६।४५	२७	२	१८
३	शु.	६०।००	समस्त	धनिष्ठा	५५।०५	रा.३।१८	आयुष्मान	५६।३२	वणिज् ३१।१४	मकर २२।०१	दि.२।०४	३।०२।११।४०	३३।४२	५।१६	६।४४	२८	३	१९
३	श.	०३।३५	प्रा.६।४२	शतभिषा	६०।००	समस्त	सौभाग्य	६०।००	भद्रा ३।०५	कुम्भ	अहोरात्रं	३।०३।०८।३८	३३।४०	५।१६	६।४४	२९	४	२०
४	र.	०८।३८	दि.८।४३	शतभिषा	०१।३८	प्रा.५।५५	सौभाग्य	०१।११	बालव ८।३८	कुम्भ ५१।२८	रा.१।५१	३।०४।०५।३६	३३।३८	५।१६	६।४४	३०	५	२१
५	चं.	१३।३४	दि.१०।४३	पूर्वाभाद्रपद	०८।०५	दि.८।३१	शोभन	०२।४७	तैतिल १३।३४	मीन	अहोरात्रं	३।०५।०२।३४	३३।३६	५।१७	६।४३	३१	६	२२
६	मं.	१७।५६	दि.१२।२६	उत्तराभाद्रपद	१४।०६	दि.१०।५५	अतिगण्ड	०४।०४	वणिज् १७।५६	मीन	अहोरात्रं	३।०५।५६।३२	३३।३४	५।१७	६।४३	१	७	२३
७	बु.	२१।३६	दि.१।५६	रेवती	१९।१९	दि.१।०२	सुकर्मा	०४।४५	बव २१।३६	मीन १९।१९	दि.१।०२	३।०६।५६।३०	३३।३२	५।१८	६।४२	२	८	२४
८	गु.	२४।०२	दि.२।५५	अश्विनी	२३।२५	दि.२।४०	धृति	०४।३५	कौलव ४।०२	मेष	अहोरात्रं	३।०७।५३।३५	३३।३१	५।१८	६।४२	३	९	२५
९	शु.	२५।२१	दि.३।२६	भरणी	२६।२५	दि.३।५२	शूल	०३।३६	गर २५।२१	मेष ४१।५१	रा.१०।०२	३।०८।५०।४०	३३।३०	५।१८	६।४२	४	१०	२६
१०	श.	२५।१९	दि.३।२७	कृत्तिका	२८।०७	दि.४।३४	गण्ड	०१।२९	भद्रा २५।१९	वृष	अहोरात्रं	३।०९।४७।४५	३३।२७	५।१९	६।४१	५	११	२७
११	र.	२४।०४	दि.२।५७	रोहिणी	२८।३६	दि.४।४५	ध्रुव	५४।१५	बालव २४।०४	वृष ५८।२१	रा.४।३९	३।१०।४४।५०	३३।२४	५।१९	६।४१	६	१२	२८
१२	चं.	२१।३५	दि.१।५८	मृगशिरा	२८।०५	दि.४।३४	व्याघात	४९।१५	तैतिल २१।३५	मिथुन	अहोरात्रं	३।११।४१।५५	३३।२१	५।२०	६।४०	७	१३	२९
१३	मं.	१८।०३	दि.१२।३३	आर्द्रा	२६।१०	दि.३।४८	हर्षण	४३।२९	वणिज् १८।०३	मिथुन	अहोरात्रं	३।१२।३८।५९	३३।१८	५।२०	६।४०	८	१४	३०
१४	बु.	१३।४०	दि.१०।४९	पुनर्वसु	२३।३५	दि.२।४७	वज्र	३७।०२	शकुनी १३।४०	मिथुन ६।१४	दि.९।०३	३।१३।३६।०३	३३।१५	५।२१	६।३९	९	१५	३१
३०	गु.	०८।३०	दि.८।४६	पुष्य	२०।१८	दि.१।२९	सिद्धि	३०।०३	नाग ८।३०	कर्क	अहोरात्रं	३।१४।३३।१६	३३।१२	५।२२	६।३८	१०	१६	१

ने.	अं.	विवरण
१	१७	श्रावणवर्जपंच्छाकम्। मैथिल नववर्षारम्भः। शिववासः, अमृतयोगः अहोरात्र, कर्के रविः २८।१० दि.४।३१, मु.४५ फलं समर्घकारकम्, [illegible] पुण्यकालः ←
२	१८	मासादिः। अग्निवासः, अशून्यशयन २ व्रतं,श्रीलक्ष्मीयुतविष्णुंपर्यंके [illegible]। प्रार्थनामन्त्रः-[illegible] ☾
३	१९	अश्लेषायां मंगल २६।२६।, बीजवपनं, धान्यछेदनं, भद्रा ३१।१४ उ.। पूर्वयात्रा। ☾ [illegible] पञ्चकारम्भः(मदवा) रा.१२।५० उ.।
४	२०	श्रीगणाधिप ४ व्रत। शिववासः-अग्निवासः प्रातः६।४२ उ., सिद्धियोगः-राज्यप्रदयोगश्च प्रा.६।४२ उ., भद्रा ३।०५ या.। पुष्ये रविः५८।४८ रा.४।४१, [illegible]
५	२१	शिववासः, अमृतयोगः दि.८।४३ उ.। ←दि.१२।०० उपरि दिने पुण्याहः। दक्षिणायनारम्भः, वर्षा ऋतुः, ने.श्रावणमासारम्भः
६	२२	मौना५, नागपंचमी५, मनसादेवीपूजन-मुत्थापनञ्च। मधुश्रावणीपूजारम्भः। सोमवासरव्रत,दग्धातिथि दि.१०।४३ उ.। शिववासः दि.१०।४३ या. ततः अग्निवासः, सिद्धियोग, ♍
७	२३	मृत्युयोगः दि.१२।२६ या. ततः अमृतयोगः, भद्रा १७।५६ तः ४६।४८ या., दग्धातिथि दि.१२।२६ या.। पश्चिमयात्रा [illegible] ❖विपणि, वस्तुनाक्रयः-हलप्रवहणं, बीजवपनं,
८	२४	श्रीशीतलासप्तमी(मध्याह्ने), कालाष्टमी व्रतं, पञ्चकसमाप्तिः(मदवा) दि.१।०२ उ., शिववासः दि.१।२६ उ., अग्निवासः, सिद्धियोगः दि.१।२६ या. ततः मृत्युयोगः, ❖
९	२५	इन्द्रसावर्णिमन्वादि, शिववासः दि.२।५५ या., सिद्धियोगः दि.२।५५ या. ततः मृत्युयोगः, सर्वार्थसिद्धियोगः दि.२।४० या.। पश्चिमे दिनयात्रा [illegible]। ♋
१०	२६	अग्निवासः, सिद्धियोगः दि.३।२६ या., भद्रा ५५।२० या.। ♋ विपणि दि.२।४० या.,वृक्षादिरोपणं-बीजवपनं दि.२।४० या.। पुष्ये शुक्र ४६।१०
११	२७	वृद्धियोगमानं५६।५२। शिववासः दि.३।२७ उ. मृत्युयोगः ३।२७ या. ततः अमृतयोगः, दक्षिणयात्रा-सर्वार्थसिद्धियोगः दि.४।३४ उ., भद्रा२५।१९ या.।
१२	२८	कामदाएकादशी ११ व्रतं सर्वेषाम्। शिववासः, अग्निवासः दि.२।५७ या, मृत्युयोगः दि.२।५७ या. ततः पूर्वदक्षिण यात्रा दि.४।४५ या. ततः पश्चिमे दिनयात्रा।
१३	२९	दूर्वादलेन पारणं, सोमप्रदोष १३ व्रतं, सोमवासरव्रतं, शिववासः दि.१।५८ या.ततः अग्निवासः, मृत्युयोगः दि.१।५८ या. ततः पूर्वे दिनयात्रा दि.४।३४ या.। सर्वार्थसिद्धियोग ♐
१४	३०	प्रदोष १४ व्रतं, अग्निवासः दि.१२।३३ या., सिद्धियोगः दि.१२।३३ ततः राज्यप्रदयोगः, भद्रा १८।०३ तः ४५।५२ या.। [illegible] बुधः [illegible]।
१५	३१	श्राद्धादौ३०, शिववासः-अग्निवासः दि.१०।४९ उ., धान्यछेदनं दि.२।४७ उ.। मार्गी बुध ३५।२५। ♐ वृक्षादिरोपणं-वस्तुनांक्रयः-हलप्रवहणं-बीजन्यासनं दि.४।३४ या.।
१६	१	अगस्त ८। श्रावणी३०, अमावस्या स्नानदान-श्राद्धादौ। शुभवारान्विते दर्शे सुभिक्षं, हरियाली३०, देवसावर्णिमन्वादिः गुरुपुष्ययोगः दि.१।२९ या.,शिववासः दि.८।४६ या ♎ ♍मौनचालं-वस्तुनांविक्रयः-बीजवनं-धान्यरोपणं,बीजन्यासनं दि.८।३१ या. ततः वीपणि। कर्के शुक्रः २।४६। पश्चिमोत्तरयात्रा पंचम्यान्। ♎ अग्निवासः, सिद्धियोगः दि.८।४६ या., सर्वार्थसिद्धियोगः दि.१।२९ या.। विपणि दि.८।४६ तः १।२९ या.।

१ बुधे वल्ली८।३६।३०।१६
अयनांशः २२।४८।१२

७ बुधे वल्ली८।३६।३०।२३
अयनांशः २२।४८।१३

१४ बुधे वल्ली८।३६।३०।३०
अयनांशः २२।४८।१४

मिश्रमानकालिकदैनिकमंगलादिस्पष्टग्रहाः दिनद्वयग्रहान्तरं गतिश्च

तिथि	दिन	भौम राश्यादि	बुध वक्री राश्यादि	वक्री गुरु राश्यादि	शुक्रः राश्यादि	वक्री शनि राश्यादि	केतु राश्यादि
१	बु.	३।१५।०५।४९	२।२६।३३।००	७।२३।४१।१०	२।२३।४९।०४	८।१९।०४।४५	८।२८।२५।११
२	गु.	३।१५।४४।२३	२।२५।५४।३५	७।२३।३५।४६	२।२५।०२।३२	८।१९।००।०५	८।२५।२२।०१
३	शु.	३।१६।२२।५७	२।२५।२१।०८	७।२३।३०।३१	२।२६।१६।००	८।१८।५५।२९	८।२५।१८।५०
३	श.	३।१७।०१।३१	२।२४।५३।१५	७।२३।२५।२६	२।२७।२९।२८	८।१८।५०।४८	८।२५।१५।३९
४	र.	३।१७।४०।०५	२।२४।३१।२४	७।२३।२०।३१	२।२८।४२।५८	८।१८।४६।१२	८।२५।१२।२८
५	चं.	३।१८।१८।३८	२।२४।१५।५४	७।२३।१५।४६	२।२९।५६।२९	८।१८।४१।३८	८।२५।०९।१७
६	मं.	३।१८।५७।१४	२।२४।०६।५७	७।२३।११।११	३।०१।१०।००	८।१८।३७।०७	८।२५।०६।०७
७	बु.	३।१९।३५।४७	२।२४।०४।[illegible]	७।२३।०६।४७	३।०२।२३।३२	८।१८।३२।३७	८।२५।०२।५६
८	गु.	३।२०।१४।२१	२।२४।०८।५४	७।२३।०२।३३	३।०३।३७।०५	८।१८।२८।०९	८।२४।५९।४५
९	शु.	३।२०।५२।५२	२।२४।१९।४०	७।२२।५८।३०	३।०४।५०।३९	८।१८।२३।४४	८।२४।५६।३४
१०	श.	३।२१।३१।२५	२।२४।३६।४७	७।२२।५४।३८	३।०६।०४।१४	८।१८।१९।२१	८।२४।५३।२३
११	र.	३।२२।०९।५९	२।२५।००।०१	७।२२।५०।५७	३।०७।१७।४९	८।१८।१५।००	८।२४।५०।१३
१२	चं.	३।२२।४८।३४	२।२५।२९।०८	७।२२।४७।२७	३।०८।३१।२६	८।१८।१०।४३	८।२४।४७।०२
१३	मं.	३।२३।२७।०७	२।२६।०३।५१	७।२२।४४।०८	३।०९।४५।०३	८।१८।०६।२८	८।२४।४३।५१
१४	बु.	३।२४।०५।४०	२।२६।४३।५४	७।२२।४१।००	३।१०।५८।४१	८।१८।०२।१६	८।२४।४०।४०
३०	गु.	३।२४।४४।११	२।२७।२९।००	७।२२।३८।०७	३।१२।१२।२०	८।१७।५८।०७	८।२४।३७।२९

दैनिकलग्नसारणी चक्रम्

मिश्रमानं	मे. अं. घं.मि.	वृ.अं. घं.मि.	मि.अं. घं.मि.	क.अं. घं.मि.	सिं.अं. घं.मि.	कं.अं. घं.मि.	तु.अं. घं.मि.	वृ.अं. घं.मि.	ध.अं. घं.मि.	म.अं. घं.मि.	कु.अं. घं.मि.	मी.अं. घं.मि.
४६।५१	१।०८	३।०४	५।१७	७।३५	९।५१	१२।०६	१४।२३	१६।४०	१८।४५	२०।३१	२२।०२	२३।३१
४६।५१	१।०४	३।००	५।१३	७।३१	९।४७	१२।०२	१४।१९	१६।३६	१८।४१	२०।२७	२१।५८	२३।२७
४६।५१	१।००	२।५६	५।०९	७।२७	९।४३	११।५८	१४।१५	१६।३२	१८।३७	२०।२३	२१।५४	२३।२३
४६।५०	०।५६	२।५२	५।०५	७।२३	९।३९	११।५४	१४।११	१६।२८	१८।३३	२०।१९	२१।५०	२३।१९
४६।४९	०।५२	२।४८	५।०१	७।१९	९।३५	११।५०	१४।०७	१६।२४	१८।२९	२०।१५	२१।४६	२३।१५
४६।४८	०।४८	२।४४	४।५७	७।१५	९।३१	११।४६	१४।०३	१६।२०	१८।२५	२०।११	२१।४२	२३।११
४६।४७	०।४४	२।४०	४।५३	७।११	९।२७	११।४२	१३।५९	१६।१६	१८।२१	२०।०७	२१।३८	२३।०७
४६।४६	०।४०	२।३६	४।४९	७।०७	९।२३	११।३८	१३।५५	१६।१२	१८।१७	२०।०३	२१।३४	२३।०३
४६।४५	०।३५	२।३१	४।४४	७।०२	९।१८	११।३३	१३।५०	१६।०७	१८।१२	१९।५८	२१।२९	२२।५८
४६।४५	०।३१	२।२७	४।४०	६।५८	९।१४	११।२९	१३।४६	१६।०३	१८।०८	१९।५४	२१।२५	२२।५४
४६।४३	०।२७	२।२३	४।३६	६।५४	९।१०	११।२५	१३।४२	१५।५९	१८।०४	१९।५०	२१।२१	२२।५०
४६।४१	०।२३	२।१९	४।३२	६।५०	९।०६	११।२१	१३।३८	१५।५५	१८।००	१९।४६	२१।१७	२२।४६
४६।३९	०।१९	२।१५	४।२८	६।४६	९।०२	११।१७	१३।३४	१५।५१	१७।५६	१९।४२	२१।१३	२२।४२
४६।३८	०।१५	२।११	४।२४	६।४२	८।५८	११।१३	१३।३०	१५।४७	१७।५२	१९।३८	२१।०९	२२।३८
४६।३७	०।११	२।०७	४।२०	६।३८	८।५४	११।०९	१३।२६	१५।४३	१७।४८	१९।३४	२१।०५	२२।३४
४६।३६	०।०७	२।०३	४।१६	६।३४	८।५०	११।०५	१३।२२	१५।३९	१७।४४	१९।३०	२१।०१	२२।३०

दैनिक अर्धप्रहरा

तिथि	दिन	दिन का अर्धप्रहरा घण्टा मिनट	रात का अर्धप्रहरा घण्टा मिनट
१	बु.	दि.८:३८ - १०:३८। दि.१२:००-१:४१	रा.१२:००-१:१६। रा.२:३८-३:५७।
२	गु.	दि.३:२२ - ६:४४।	रा.१२:००-१:१६ रा.३:५७-५:१६
३	शु.	दि.८:३६ - १२:०१।	रा.६:२३-१०:४२।
३	श.	प्रा.५:१७-६:५८ दि.१:४२-३:२३। दि.५:३-६:४३	सा.६:४३-८:०३ रा.१:२०-२:३६ रा.३:५८-५:१७
४	र.	दि.१०:२० -१:४२ ।	रा.१०:४२-१२:०१ रा.१:२०-२:३६।
५	चं.	दि.६:५६-८:४०। दि.३:२२-५:०२।	रा.१०:४२-१२:०२ रा.२:३०-३:४६।
६	मं.	दि.६:५६-८:४० । दि.३:२२-५:०२।	रा.८।०२-९:२२
७	बु.	दि.८:४१-१०:२१। दि.१२:०१-१:४१।	रा.१२:०१-१:२६। रा.२।४१-५।१६।
८	गु.	दि.३:२६-६:४१	रा.१२:०१-१:२६। रा.४:००-५:१६।
९	शु.	दि.८:४०-१२:००।	रा.६:२०-१०:४०।
